इति हेमचन्द्रः ॥ (यथा, रामायणे ।२।४५।११।
"यथा यथा दाशरथिर्धर्म्ममेवाश्रितोऽभवत् ।
तथा तथा प्रकृतयो रामं पतिमकामयन् ॥")

दाशार्हः, पुं, (दाश्र दाने+भावे घञ् । दाशं दानमर्हतीति । अर्ह+अच् ।) विष्णुः । इति हेमचन्द्रः ॥ (यथा, महाभारते ।१३।१४६।६७।
"विजयो जयः सत्यसन्धो दाशार्हः सात्वतां पतिः ॥")
दशार्हदेशजश्च ॥

दाशेरकः, पुं, मालवदेशः । इति त्रिकाण्डशेषः ॥

दाश्वः, त्रि, (दाशति ददातीति । दाश+बाहुलकात् वन् ।) दाता । इति जटाधरः ॥

दाश्वान्, [स्] त्रि, (दाश्र दाने+"दाश्वान् साह्वान् मीढ्वांश्च ।" ६।१।१२। इति क्वसुप्रत्ययेन निपातनात् साधुः ।) दत्तवान् । इति मुग्धबोधम् ॥ (यथा, रघुः । १४ । ७१ ।
"तस्मै मुनिर्दोहदलिङ्गदर्शी
दाश्वान् सुपुत्राशिषमित्युवाच ॥")

दास, ऋ ञ दाने । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) ऋ, अददासत् । ञ, दासति दासते । इति दुर्गादासः ॥

दास, र न वधे । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् ।) र वैदिकः । न, दास्नोति । इति दुर्गादासः ॥

दासः, पुं, (दस्यतीति । दसि+"दंसेष्टटनौ न आत् ।" उणां ५ । १० । इति टः नकारस्य चाकारः :) शूद्रः । (यथा, ऋग्वेदे ।२।१२।४।
"यो दासं वर्णमधरं गुहाकः ॥"
अधुना कायस्थानां उपाधिभेदः । स तु अष्टसिद्धमौलिकानामन्यतमः । यथा, कुलदीपिकायाम् ।
"गौडेऽष्टौ कीर्त्तिमन्तश्चिरवसतिकृता मौलिका ये हि सिद्धास्ते दत्ता सेनदासाः करगुहसहिताः पालिताः सिंहदेवाः ॥")
ज्ञातात्मा । धीवरः । इति मेदिनी । से, ६ ॥ दानपात्रम् । इति विश्वः ॥ शूद्राणां नामान्तप्रयोज्यपद्धतिविशेषः । यथा,—
"शर्म्मान्तं ब्राह्मणस्यस्यात् वर्म्मान्तं क्षत्रियस्य च । गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः ॥"
इत्युद्वाहतत्त्वम् ॥ * ॥
दास्यते दीयते भूतिमत्यादिकं यस्मै सः । चाकर इति भाषा । तत्पर्य्यायः । भृत्यः २ दासेरः ३ दासेयः ४ गोप्यकः ५ चेटकः ६ नियोज्यः ७ किङ्करः ८ प्रैष्यः ९ भुजिष्यः १० परिचारकः ११ । इत्यमरः । २ । १० । १७ ॥ प्रेष्यः १२ प्रेषः १३ प्रैषः १४ । इति भरतः ॥ परिकर्म्मा १५ पादचरः १६ सहायः १७ उपस्थाता १८ सेवकः १९ अभिसरः २० अनुगः २१ । स पञ्चदशविधः । यथा नारदः ।
"गृहजातस्तथा क्रीतो लब्धो दायादुपागतः ।
अन्नाकालभृतस्तद्वदाहितः स्वामिना च यः ॥
मोचितो महतश्चर्णात् युद्धे प्राप्तः पणे जितः ।
तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥
भक्तदासश्च विज्ञेयस्तथैव वड़वाकृतः ।
विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः ॥"
अस्यार्थः । गृहजातो दास्यासुतपन्नः । दायादुपागतः क्रमागतः । अन्नाकालभृतः दुर्भिक्षपोषितः । स्वामिना आहितो बन्धकीकृतः । मोचितः ऋणमोचनेनाङ्गीकृतदास्यः । तवाहमित्युपगतः कस्याप्यदासः सन् स्वयं दासत्वेन दत्तरूपः । प्रव्रज्यावसितः सन्न्यासभ्रष्टः । कृतः केनचिन्निमित्तेन एतावत्कालपर्य्यन्तं तवाहं दास इति कृतसमयः । भक्तदासः सुभिक्षेऽपि भक्तार्थमङ्गीकृतदास्यः । वड़वाकृतः वड़वा दासी तल्लोभादङ्गीकृतदास्यः । इति श्रीलक्ष्मणवर्म्मकुङ्गारकृतकर्मसंग्रहः ॥ तस्य कर्म्म यथा,—
"कर्म्मापि द्विविधं ज्ञेयमशुभं शुभमेव च ।
अशुभं दासकर्म्मोक्तं शुभं कर्म्मकृतां स्मृतम् ॥
गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम् ।
गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम् ॥
अशुभं कर्म्म विज्ञेयं शुभमन्यदतः परम् ॥"
इति मिताक्षरायां नारदः ॥
"विप्रस्य किङ्करो भूपो वैश्यो भूपस्य भूमिप ।
सर्व्वेषां किङ्कराः शूद्रा ब्राह्मणस्य विशेषतः ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥

दासनन्दिनी, स्त्री, (दासस्य धीवरस्य नन्दिनी ।) सत्यवती । इति शब्दरत्नावली ॥

दासपुरं, क्ली, (दासान् धीवरान् पूरयतीति । पूर+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) कैवर्त्तीमुस्तकम् । इति शब्दरत्नावली ॥

दासिका, स्त्री, (दासति ददाति आत्मानमिति । दास दाने+ण्वुल् । टाप् अत इत्वञ्च ।) दासी । इत्यमरटीकायां भरतः ॥

दासी, स्त्री, (दासति ददात्यात्मानमिति । दास+अच् । गौरादित्वात् ङीष् ।) भुजिष्या । इति मेदिनी । से, ४ ॥ तत्पर्य्यायः । कर्म्मकरी २ । इति मुग्धबोधम् ॥ दासपर्य्यायशब्दाः स्त्रीलिङ्गे अस्याः पर्य्यायशब्दा भवन्ति ॥ (यथा, देवीभागवते । १ । २० । ७२ ।
"न गता च वधूस्तत्र प्रेष्या संप्रेषिता तया ।
तस्याञ्च विदुरो जातो दास्यां धर्म्मांशतः शुभः ॥")
काकजङ्घा । नीलाम्लानः । नीलझिण्टी । इति राजनिर्घण्टः ॥ पीतझिण्टी । इति रत्नमाला ॥ वेदी । इति विश्वः ॥ (दास+ङीप् ।) शूद्रपत्नी कैवर्त्तपत्नी च ॥ (नदीभेदः । यथा, महाभारते । ६ । ९ । ३१ ।
"सुरसां तमसां दासीं सामान्यां वरणामसीम् ॥")

दासीघटः, पुं, (दासीपादनिक्षेप्यो घटः । मध्यपदलोपिसमासः ।) नवम्यां महापातकिनः परित्यागार्थं सपिण्डसमानोदकनियुक्तदक्षिणाभिमुखदासीपादनिःक्षेप्यजलपूर्णकलसः । तदनुष्ठानं यथा, मनुः । ११ । १८३—१८५ ।
"पतितस्योदकं कार्य्यं सपिण्डैर्बान्धवैर्बहिः ।
निन्दितेऽहनि सायाह्ने ज्ञात्यृत्विग्गुरुसन्निधौ ॥
दासीघटमपां पूर्णं पर्य्यस्येत् प्रेतवत् पदा ।
अहोरात्रमुपासीरन्नशौचं बान्धवैः सह ॥
निवर्त्तेरंश्च तस्मात्तु सम्भाषणसहासने ।
दायाद्यस्य प्रदानञ्च यात्रा चैव हि लौकिकी ॥"
"पतितस्येति । महापातकिनो जीवत एव प्रेतस्योदकक्रिया वक्ष्यमाणरीत्या सपिण्डैः समानोदकैश्च ग्रामाद्बहिर्गत्वा ज्ञात्यृत्विग्गुरुसन्निधाने रिक्तायां नवम्यां तिथौ दिनान्ते कर्त्तव्या ॥ दासीति । सपिण्डसमानोदकनियुक्ता दासी उदकपूर्णं घटं प्रेतवदिति दक्षिणाभिमुखीभूय पादेन क्षिपेत् । यथा स निरुदको भवति तदनु ते सपिण्डाः समानोदकैः सहाहोरात्रमशौचमाचरेयुः ॥ निवर्त्तेरन्निति । तस्मात् पतितात् सपिण्डादीनां सम्भाषणमेकासनोपवेशनञ्च तस्मै ऋक्थप्रदानं सांवत्सरिकादौ निमन्त्रणादिरूपो लोकव्यवहार एतानि निवर्त्तेरन् ॥" इति कुल्लूकभट्टः ॥

दासीसभं, क्ली, (दासीनां सभा । "अशाला च ।" २।४। २४ । इति क्लीवत्वम् ।) दास्याः सभा । इत्यमरः । ३ । ५ । २७ ॥

दासेयः, पुं, (दास+स्वार्थे ढक् ।) दासः । इत्यमरः । २ । १० । १७ ॥ कैवर्त्तः । इति शब्दरत्नावली ॥ (दासस्य अपत्यमिति ।) दासीतुपन्ने, त्रि ॥

दासेयी, स्त्री, (दासेय+स्त्रियां ङीप् ।) सत्यवती । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । १०० । ४६ ।
"समीक्ष्य राजा दासेयीं कामयामास शान्तनुः ॥")

दासेरः, पुं, (दास्या अपत्यम् । ढ्रक् ।) दासः । इत्यमरः । २ । १० । १७ ॥ कैवर्त्तः । इति शब्दरत्नावली ॥ (दास+बाहुलकात् एरच् ।) उष्ट्रः । दासिकापत्ये, त्रि । इति मेदिनी । रे, १६८ ॥

दासेरकः, पुं, (दासेर+स्वार्थे कन् ।) उष्ट्रः । इति राजनिर्घण्टः ॥ (यथा, माघे । ५ । ६६ ।
"दासेरकः सपदि संवलितं निषादै-
र्विप्रं पुरा पतगराड़िव निर्जगार ॥")
दासीसुतः । इति हारावली । २४८ ॥ (जातिभेदः । यथा, महाभारते । ६ । ४७ । ४६ ।
"दशार्णकाः प्रयागाश्च दासेरकगणैः सह ॥")

दास्यं, क्ली, दासस्य भावः । (दास+ष्यञ् ।) दासत्वम् । यथा,—
"अर्च्चनं वन्दनं मन्त्रजपः सेवनमेव च ।
स्मरणं कीर्त्तनं शश्वद्गुणश्रवणमीप्सितम् ॥
निवेदनं स्वस्य दास्यं नवधा भक्तिलक्षणम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

दास्यमानः, त्रि, दाधातोः कर्म्मणि स्यमानप्रत्ययेन निष्पन्नः । भविष्यद्दानसम्बन्धिवस्तु । इति व्याकरणम् ॥ "अपि च ऊनविंशतिदास्यमानपिण्डस्थानानि यथा ।" इति तिथ्यादितत्त्वम् ॥

दाहः, पुं, (दह+भावे घञ् ।) दहनम् । भस्मीकरणम् । (यथा, मार्कण्डेये । ३० । २३ ।
"तदभावे च नृपतिः कारयेत् स्वकुटुम्बिना ।